No. १३३९

Title कारणता वाद:

Author x

Extent ५ Age x

Subject [illegible]

कारणतावादः

१२२५

त्वाद्रूपसिरणजनकत्वाच्चानन्यथासिद्धत्वे दण्डत्वादिना कारणं विशेषणीयं किन्तु येन रूपेणानन्यथासिद्धत्वं तदन्यूनमेवत्वं प्रकृते निवेशनीयं कार्याव्यवहित
पूर्ववृत्तित्वे कार्यैकाधिकरणत्वे एकद्रव्यावच्छिन्नत्वात् व्यापकत्वमुत्पद्यते तथा च विघटकदण्डत्वादिना घटविशिष्टस्य घटसामान्यादौ जनकतया चरणे कार्यनियत
ताव्यवहितपूर्ववृत्तित्वजातीयतानिवेशः स्वातन्त्र्यादीनामनन्यथासिद्धिकरणं दण्डादीनामपि दण्डत्वादिना घटादिस्वरूपयोग्यत्वाज्जातीयत्व
निवेशः ॥ तथा चानन्यथासिद्धनिवेशकरूपकनियतपूर्ववृत्तितावच्छेदकधर्मवत्त्वं तत्त्वमपुरस्कारेण समुदायार्थः ॥ कार्यतावच्छेदक
नियतनियतपूर्ववृत्तितावच्छेदकत्वमेव व्याप्तियारहितं तेन न कुत्रापि दानियतपूर्ववृत्तितावच्छेदकत्वं न तावता नाव्यवहितपू
र्वत्वाश्रययावत्कारणतावच्छेदकत्वं तदा रासभादिकार्यं प्रतियोगित्वादेरेव तत्त्वप्रसङ्गः ॥ सर्वोघटव्यवहितपूर्ववृत्ति योग्यतानास्तीति असत्त्वा
त्कालिकविशेषणतया पारतन्त्र्ये सत्त्वं चेन्न तादृशरूपवत्त्वविशेषणोऽव्यवहितपूर्वत्वमिति चेत्तर्हि विशिष्टबुद्धिविशेषणेन
न यः कार्यकारणभावो विशिष्टस्यैतावद्वाव्यवहितपूर्वत्वस्य कार्यतावच्छेदके निवेशनं प्रामाणिकं विशिष्टं तत्त्वेन विशेषणज्ञान
त्वावच्छिन्नलक्षणानुगतात्मकविशिष्टबुद्धिरूपं काले कालिकविशेषणतया तादृशरूपकत्वेन पूर्वकाले प्रसंस्कारात्मकमारभ्य चेन्न सत्त्वा
द्विशिष्टबुद्धित्वावच्छिन्नप्रतिनिरूपितनियतपूर्ववृत्तितावच्छेदकतायाः एवं विशेषणज्ञानत्वादौ सत्त्वात् एवं तादृशनियतपूर्ववृत्तितावच्छे

दकतापाकरणतावच्छेदकप्रवेशे घटत्वावच्छिन्नप्रतियोगिताकत्वस्य योगवादिनापि हेतुतापत्तिः तदवच्छिन्नस्यापि चेद्द्रव्यघटे भेदे न घटाद्य
वहितप्राक्काले न रूपसत्त्वाद्यवच्छिन्नाधिकरणनिष्ठाधिकरणतायां भेदघटसंबंधावच्छिन्नाधिकरणतावच्छेदकता निरूपकतावच्छेदकत्वा
धिकस्यापि नैश्यापि द्रव्याद्यो घटतंतु संयोगस्य सत्त्वादिना हेतुतापत्तिर्दुर्वारैव। अथ कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरण
वृत्तियः कारणतावच्छेदकसंबंधावच्छिन्नाभावः तत्प्रतियोगितानवच्छेदकत्वस्वरूपकारणत्वमिति देशिककालिकव्याप्यकतावच्छेदकत्व
मेव तत्र घटाद्यधिकरणकपालादौ तदुत्पत्तिकालावच्छेदेन विशिष्टाभावप्रतियोगिघटाभावसत्त्वात् तत्र तद्धेतुतानुपपत्तिरिति कार्याव्यवहि
तपूर्वक्षणावच्छिन्नत्वं च तत्र विशेषणं एकघटाधिकरणप्रागवच्छिन्नाक्षणावच्छेदेनान्यघटाधिकरणककपालादौ विजातीयसंयोगाद्यभा
वसत्त्वात्। अव्याप्तिरिति न शंकनीयं। स्वाव्यवहितप्राक्क्षणावच्छिन्नस्वाधिकरणवृत्तित्वसंबंधेन कार्यविशिष्टस्याभावनिवि
ष्टानायत्त्वात्। नयेवं घटत्वावच्छिन्नं प्रति तत्कपालत्वादिना चैतादात्म्येन हेतुतापत्तिः घटाधिकरणकपालांतरे व्याप्यवृत्तिस्तत्क
पालत्वावच्छिन्नभेदवत्तो कालविशेषस्यानवच्छेदकत्वात् तादृशाभावस्य प्रतीतुमशक्यत्वादिति वाच्यं। स्वाव्यवहितपूर्वक्षणाव
च्छिन्नत्वसंबंधेन घटत्वतादृशक्षणावच्छिन्नो तत्तत्कपालाभावस्यैव कायेऽनायत्त्वात् तादात्म्याभावापेक्षया तावदवच्छिन्नत्वनिरूहणे

त्रयान्यायस्याकृतत्वात्॥ यागादेः स्वर्गादिकारणतानिर्वाहाय यत्तन्नियतपूर्ववर्त्तितावच्छेदकत्वं तन्नियतपूर्ववर्त्तितावच्छेद
कावच्छिन्ननियतपूर्ववर्त्तितावच्छेदकत्वान्यतरत्वमेव कारणतावच्छेदकधर्मे निवेशनीयं यागत्वादेः स्वर्गविशेषादिनिय
तपूर्ववर्त्तितावच्छेदकत्वविरहेऽपि तादृशस्वर्गादिनियतपूर्ववर्त्तितावच्छेदकापूर्वविशेषत्वाद्यवच्छिन्ननियतपूर्ववर्त्तितावच्छे
दकत्वेनान्यतरत्वमक्षतमेवेति चेन्न॥ घटाद्यन्यत्वादेरपि पूर्वक्षणेऽपि तदधिकरणकपालादौ किंचित्कपालिकाद्यवच्छे
न विद्यमानाय संयोगाभावस्यापि किंकाप्याप्यवच्छिन्नाभावविशेषसंयोगादीनां कारणत्वानुपपत्तेरदुष्टत्वात्॥ प्रतियोगि
वैयधिकरण्यस्याभावविशेषणत्वोपगमे तु तद्घटादिकं प्रति तद्घटत्वकृत्संयोगान्यतरत्वादिना हेतुतापत्तेर्दुर्वारत्वात्॥ घटा
द्यधिकरणनिष्ठस्य तद्रूपावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्यत्वात्॥ अत्राधिकनिष्ठकार्याधिकरणवृत्तित्वविशेषणनिष्ठ
पितत्वविलक्षणस्यैव घटाद्यन्यत्वविशेषणत्वोपपत्तौ देवदत्तस्याप्यदृष्टविशेषनिष्ठविनाशेऽदृष्टनाशस्य भावाय नाव्याप्यवृत्तिकारणताक्षति
रिति वाच्यम्॥ तथापि समवायेन ज्ञानत्वाद्यवच्छिन्नं प्रति ज्ञानत्वादिना हेतुतापत्तेर्ज्ञानाद्यधिकरणात्मादिनिष्ठत्वे तादात्म्यसिद्धि
रितिः ज्ञानाद्यभावस्याप्यवृत्तितया तदवच्छिन्नतदधिकरणनिष्ठज्ञानाद्यवच्छेदकतत्क्षणावच्छिन्ना
भावस्य ज्ञानावच्छेदकतत्क्षणावच्छिन्ना

का०व्या०

3

3

याह्यनाधनानापवृत्ते घटाद्यवच्छिन्नतदधिकरणनिष्ठज्ञानावच्छेदकक्षणावच्छिन्नतदापवृत्तिताभिन्नत्वे मानाभावात् तादृ
क्षणावच्छकार्याधिकरणदेशावच्छिन्नवृत्तित्वविरहात् न च कार्याधिकरणदेशावच्छिन्नकार्याव्यवहितप्राक्क्षणाव
च्छिन्नत्वावाय कालिकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वमेव नियतपूर्ववर्तितावच्छेदकत्वं विवक्षितम् अतो यसंयोगाद्य
धिकरणदेशावच्छेदेन तद्दत्तिकपाले विद्यमानायसंयोगादेः कालिकसंबंधावच्छिन्नप्रतियोगितामवच्छेदकत्वमेव नियतपूर्व
वर्तिता दैनाशावच्छेदौ विरोधादिति नोक्तव्याप्यव्यतिकारणत्वानुपपत्तिः एतेन पूर्वोक्तनियतपूर्ववर्तितावच्छेदकत्वनिमि
वेशेजौ कृत्स्नस्त्वावच्छिन्नं प्रतीवृज्ञानत्वावच्छिन्नं घटितपि निमयत्वेन तादात्म्यघटस्य सत्वात् हेतुतापत्तेः निमयतयाहा
नत्वावच्छिन्नानुमित्यादिमम्पतानादिविषये कार्याव्यवहितप्राक्क्षणावच्छेदेनाधिकरणतावच्छेदकतादात्म्यसंबंधेनावि
षयत्वावच्छिन्नाज्ञानस्य नेदं रूपघ्यासत्वादित्यपि निरस्तं तदानीतादृ विषयत्वावच्छिन्नं भेदेन कालेकालिकसंबंधावच्छिन्न
ज्ञानसत्वादिति वाच्यं॥ एवं सति कारणतावच्छेदकसंबंधस्य नियतपूर्ववर्तितावच्छेदकत्वात् घटकतया कारणस्य संबंध
विशेषानियतत्वाभावादुपपत्तेः॥ शाब्दज्ञानसंबंधविशेषघटितदैशिकव्याप्यकतावच्छेदकता स्यात् क्रमेणानिवेशे तदनुपपादाने

श्रीराम
3

घटादिकं प्रतिसमवायेनाभावः स्वात्यतरत्वादिनापि हेतुतापत्तिः तत्र निरूक्तनियतपूर्ववर्त्तित्वघटकेतरकूतायाः समवाय व
च्छेनदैशिकव्यापकतावच्छेदकता यस्माद्घतत्वात् ॥ एवमतीताघवच्छेदेन कालिकसंबंधावच्छिन्नप्रतियोगिताकनिश्चय
त्वावच्छिन्नाभावस्याप्रामाणिकत्वया ज्ञानव्याप्यवृत्ति नप्रतिदरस्यैनविषयत्वेन हेतुताप्रसंगस्यतन्मतेपिदुर्वारत्वात्
च ॥ यत्तु स्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयवत्त्विनापि कार्यानिरूपितेदप्रतियोगितावच्छेदकता
तदनवच्छेदकत्वमेवनियतपूर्ववर्त्तितावच्छेदकत्वं सामानाधिकरण्यंच वरणोघत्तावद्वदकसंबंधात्त्याबोध्यकत्वरा
घच्छिन्नरत्तोक्तिविदे शावच्छेदेनाविज्ञातायसंयोगाघनावसक्वेपिनकुत्राघ्यधिकरणदावुकसंबंधेन विज्ञातायसंयोग
दिमतोनेदोवर्त्ततद्वृत्तिविज्ञातायसंयोगत्वादौनिरुक्तप्रतियोगितावच्छेदकत्वमक्षत मेव एवमतीताद्विमात्रविष
यानुमित्यादौतादात्म्यविषयतोभयप्रतितसामानाधिकरण्यस्वाधिकरणक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभय

संबंधेनविषयत्वेऽद्रव्यापिज्ञानत्वावच्छिन्नप्रतिबंधकतांतन्मन्यमानस्याप्रतिबंधकत्वे ज्ञानापाद्यानुमितिप्रसंगः एकत्वस
मवायेनविजातीयसंयोगप्रतिक्रियात्वेन हेतुत्वे उत्तरदेशव्यक्तेचारवारणायास्यावच्छिन्नत्वस्य रूपप्रतिक्रियाविशेषस
५ मवायस्यकार्यतावच्छेदकसंबंधानुधावनमपीति नर्थकं रूपसमवायस्यतथात्वेऽपि सर्वत्राधिकापेक्ष्य कोनाकिंचित्चिक
रणेषुआकरणावच्छेदेनकारणसत्त्वेनतिरूकनियतिनियतपूर्ववर्तितावच्छेदकतया: कारणतावच्छेदकत्वानौ हाद्देतीत्
दृष्टिना॥तथासतिघटादिवं प्रतिरूपत्वाभावत्वाद्विनापिहेतुताप्रसंगात् रूपात्पत्तानापच्या सदातनत्वयासर्वेषांचैवचघटादि
षुतदच्छिकरणाव्यवहितोत्तरक्षणोत्पन्नत्वसत्त्वात्सर्वेषामेवतेषामवच्छिकरणेरूपादानुत्पत्तिकालावच्छेदेनरूपापत्ताव
सत्वान्तत्सामानाधिकरण्यस्यापितेषुसत्त्वादिति। उच्यते॥ सामवायवृत्तिरूपत्वावच्छिन्नसमानाधिकरणावृत्तित्वसंबंधे
नकार्यविशेषयोर्जनकसादायसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वमेवनियतपूर्ववर्तितावच्छेदक

त्वमेवेति यत्तच्चिवर्त्तितावच्छेदकत्वं अव्याप्यवृत्तीनां विजातीयसंयोगादीनां समवाये नैवाव्याप्यवृत्तितया सामानाधिक
रण्यसंबंधेन गगनत्वात्यन्ताभावेति घटादि समानाधिकरणे रूपाभावादौ वृत्तिधर्मे घटाव्यवहित पूर्वक्षणावच्छेदेन सामाना
धिकरण्यसंबंधावच्छिन्नप्रतियोगिताकस्य दण्डाभावेनाक्षतिस्तत्कारणत्वोपपत्तिः॥ अतात मात्रविषयकानुमित्यादि स
मानाधिकरणे तादृशाद्विजयपर्निरूपितव्याप्तित्वादौ तादात्म्यघटित सामानाधिकरण्यसंबंधेनाविषयत्वान्वयितास्यामा
वोऽस्तु एवेति नञ्पदत्वावच्छिन्नप्रतितादात्म्यप्रत्यासत्या विषयत्वेन हेतुताप्रसंगः प्रमेयसामानाधिकरण्यं का
र्येतावच्छेदकसंबंधेन स्वाधिकरणे स्वरूपसंबंधेन वृत्तिः चरमसंस्कारत्वतावच्छेदकसंबंधेन स्वाधिकरणे स्वरूप
संबंधेन स्वाधिकरणे स्वरूपसंबंधेन वृत्तिरन्वसंबंधभेदमादायनन्नदोषः॥ व्याप्यवृत्तेरवावृत्तत्वान मुक्तामे
स्याव्यवहित पूर्वक्षणावच्छिन्नत्वस्यानेरुपेपि दर्शितत्वान्निरसिद्धु भयाभावत्वस्य मिथैक्यानाभ यागादेः स्वर्गादिकारणत्वमपि

का॰वा॰
५ वैवदुपपादनायमितिवदंति॥ अतएवकारणत्वस्यनिरुक्तरूपत्वेतत्अलक्षान्यथासिद्धिनिरूपकधर्मभेदकूटस्यप्रातिस्वि
करूपेणपृथगसहघटितपित्यानुमभ्युपगतयाकारणत्वस्यापिदुर्ज्ञेयत्वापत्तिः॥ नचतादृशभेदकूटविशिष्टविशेषणतावि
५ शेषसंबंधेननिरुक्तनियतपूर्ववृत्तितावच्छेदकत्वत्वमेवकारणताशरीरेनिवेश्यं॥ तथाचसंबंधघटितानस्यनिविष्ट
सुहावहेतुतयाऽनुपस्थितानामेवभेदानांसंबंधघटकतयाज्ञानसत्त्वदृतिनाच्यं॥ भेदकूटविशिष्टत्वेनविशेषणताविशेष
स्यसंबंधत्वेमानाभावात्॥ एवंनिरुक्तकारणतायाःचयितावच्छेदकघटितायाः॥ स्वर्गकामोयजेतेतिवाक्यात्यागादेःस्वर्गादि
साधनत्वग्रहानुपपत्तिः॥ यागादिजन्यतावच्छेदकस्यस्वर्गनिष्ठजातिविशेषादेःअनुपस्थितत्वात्॥ तादृशविधिवाक्यात्साधनका
यिकारणत्वावग्रहोत्तरमेवकार्यतायाः॥ किंचिदवच्छिन्नत्वनियमबलेनातिप्रसक्तस्वर्गत्वाद्यवच्छिन्नत्वबाधसहकृतेनया
गादिजन्यतायांस्वर्गत्वाद्यवच्छिन्नतरधर्मनिरूपावच्छिन्नत्वग्राहकानुमानेनजातिविशेषोपस्थानात्एवमेतन्मतेप्रवृत्तौजायमाने श्रीराम
प ५

प्रमेदाग्रहत्वादिना हेतुता कल्प्यते कारणतावच्छेदकगौरवात् विनिगमकज्ञानत्वेन हेतुताया घ्याऽव्यापकत्वातिसिद्धिरप्यपिन
स्यात्॥ तादृशगुरुधर्मस्यानियतपूर्ववर्तितावच्छेदकत्वमप्युन्नयवादिसिद्धत्वात्॥ अन्यथासिद्धिनिरूपको धर्मः तद्भेदस्यापिन
त्वनप्यात्वात्प्रवृत्तिकारणतावच्छेदकतादृशधर्मभेदस्य प्रयोजनविरहेणानिवेशनीयत्वादित्यादिबहुविधदुरुद्धरदोष
दुष्टानः सिद्धान्तिमतानुरुन्धानाः सम्प्रदायविदः कारणत्वं स्वरूपसम्बन्धविशेष एवेति प्रतिपत्तितदपि न साधीयः घटादिका
रणतायाः कारणीभूतदण्डादिस्वरूपत्वे दण्डादिना समं तस्याधाराधेयभावानुपपत्तिः अन्नेदंपितदुपगमे दण्डो दण्डवानि
त्यादिप्रतीत्यापत्तिः॥ दण्डत्वस्वरूपत्वसम्प्रतियोगित्वानुपपत्तेः ज्ञाते निष्प्रतियोगिकत्वात्॥ दण्डत्वाद्यवच्छिन्नत्वानुपपत्तेश्च
नेदेनावच्छेद्यावच्छेदकभावविरहात् अन्नेदंपितदुपगमे दण्डत्वेन घटकारणमिति वद् दण्डत्वेन दण्डत्वमित्यादिप्रतीत्या
पत्तेः तस्मात्कारणत्वं पदार्थान्तरमेव तद्यावच्छेदकभेदाद्भिद्यते तदनुगमकं कारणतात्वमप्यतिरिक्तमेव कार्यत्वस्य
प्यौतिराचितित्तदुक्तमेव युक्तमाजोऽयामः॥ कारणतावच्छेदकस्य दण्डत्वादिः दण्डस्यैव कारणता तस्य च कारणत्वेन घटादि

कारणतावाद सं० १८

का०ला०
६

प्रतियो ...त्वं ज्ञातेः स्वरूपतायाञ्च निरूपितियोगित्वोपगमात् एवं च कारणतात्वेनावच्छेदकतास्वरूपेणावच्छेदकता ऽ भेदे ऽपि भिन्न
6 रूपेणावच्छेदकत्वावच्छेदकत्वाभावोपगमे क्षतिविरहात् सुतरां पि... चित्॥ कारणत्वं त्रिविधं। समवायिकारणत्वमसमवायिका
रणत्वं निमित्तकारणत्वं च तत्र समवायसंबंधावच्छिन्नकार्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणता समवायिका
रणता समवायसंबंधावच्छिन्नकार्यतानिरूपितसमवायस्वाश्रयसमवेतत्वान्यतरसंबंधावच्छिन्नकारणता ऽसम
कृपाल वायिकारणता यथा॥ तन्त्वादिकं प्रति संयोगादेः घटादिरूपादिकं प्रति कपालरूपादेः अविनाभावानुमितपादसंयोगपरम
...दीनां समवायिकारणता व्यवहाराभावात् क्वापि निरूपिततत्तत्कारणानिष्ठकारणतानां भेदकूटवत्त्वम् असमवा
यिकारणताद्वयशून्यत्वमेव वा ... तदुभयकारणतातिरिक्तकारणत्वं निमित्तकारणतेति संक्षेपः॥ ॥श्रीः॥ ॥ ॥
श्रीधरेशसहस्रबाहुजयः॥ ॥श्रीः॥ ॥

१८०

श्रीराम
८